# Sanandanaproktam Shivavidyamahimavarnanam

# સનન્દનપ્રોક્તં શિવવિદ્યામહિમાવર્ણનમ્

## Document Information

Text title : Sanandanaproktam Shivavidyamahimavarnanam 1

File name : shivavidyAmahimAvarNanam1.itx

Category : shiva, shivarahasya

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shivarahasyam | harAkhyaH tRitIyAMshaH | uttarArdham | adhyAyaH 29 | 5-20 ||

Latest update : January 30, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 1, 2024

*sanskritdocuments.org*

# સનન્દનપ્રોક્તં શિવવિદ્યામહિમાવર્ણનમ્

સત્યવ્રતઃ -
સનન્દનાપૂર્વમિદં પ્રપશ્ય જ્યોતિઃ કદાચિન્ન વિલોકિતં ચ ।
ન વા શ્રિતં કિઞ્ચિદિદં વદાશુ લોકસ્ય તત્ત્વં વિદિતં ત્વયા તુ ॥ ૫॥

સનન્દનઃ -
શ્રીપઞ્ચાક્ષરવિદ્યયા સ્થિરમતિર્નિત્યં શિવારાધકો
ભસ્મોદ્ધૂલિતવિગ્રહઃ શ્રુતિલસદ્ભૂતિત્રિપુણ્ડ્રાઙ્કિતઃ ।
ત્યક્ત્વા દેવમુમાસહાયચરણધ્યાનાતિપૂતોઽધુના
ગૌરીનાથપદારવિન્દભજનં કર્તું પ્રયાતિ ધ્રુવમ્ ॥ ૬॥

અયં પુણ્યપુઞ્જસ્વરૂપોપ્યપાપો વિધૂતાધિતાપો વિશેષેણ દૃષ્ટઃ ।
અદૃષ્ટં સમુદ્ભૂતમેવાદ્ય સત્યં કિમેતાદૃશાલોકને શોકશૂકમ્ ॥ ૭॥

અપારરવિમણ્ડલપ્રકરમાલિકાસન્નિભં
પ્રયાતિ શિવમન્દિરં સકલલોકશોકાપહમ્ ।
વિલોકય વિલોકય સ્મરહરોરુવિદ્યાનિધિં
પુનર્નયનગોચરઃ કિમયમદ્ય ભૂયો નૃપ ॥ ૮॥

વિભાતિ શિવવિદ્યયા તરણિમણ્ડલસ્યાપ્યયં
નિરોધકતયા મિતોપ્યમિતભાનુમાલાયિતઃ ।
ઇદં ખલુ મહત્તરં ભવતિ ભાગ્યમીશાર્ચના-
દયં ભવતિ શઙ્કરપ્રવણમાનસઃ સર્વદા ॥ ૯॥

શિવાર્ચનફલં પરં ભવતિ તાવદેતાદૃશં
પ્રભૂતબહુપુણ્યવાનયમુમાસહાયાર્ચકઃ ।
અયં ગુરુરિતિ શ્રુતઃ શિવપરાયણાનાં પરં
પ્રદર્શનમયં કરોત્યનઘશૈવમાર્ગસ્ય કિમ્ ॥ ૧૦॥

મહાન્ ખલુ શિવાર્ચકો ભુવનમણ્ડલાખણ્ડલઃ

પ્રચણ્ડતરપાતકપ્રચલપર્વતાનાં પવિઃ ।
કિમેવમિદમદ્ભુતં શિવપદામ્બુજારાધનં
મહાઘવનપાવકં સકલલોકસન્તોષદમ્ ॥ ૧૧॥

સ યાતિ શિવમન્દિરં શિવપદામ્બુજારાધના-
દિહૈતદવલોકનાદ્ભવતિ પુણ્યરાશિઃ સ્થિતા ।
સુખામ્બુનિધિરુત્થિતઃ શિવજનેષ્ટચન્દ્રોદયા-
દહો ભવતિ દેહિનાં શિવપદાર્ચનં પુણ્યતઃ ॥ ૧૨॥

સ કિં મમ સખા પિતા કિમુત સોદરો વા હિત-
સ્ત્વયાપિ શિવપૂજકઃ સકૃદવેક્ષિતો વા ભૃશમ્ ।
પ્રયચ્છતિ કથં સુરપ્રવરશઙ્કરારાધકઃ
કદમ્બવનભૂરુહો ભવતિ દુર્લભો દુર્લભઃ ॥ ૧૩॥

અનેન જનનોત્તરં શિવપદામ્બુજારાધના-
દવાપ્તમતુલં જગદ્ભવતિ ભાગ્યમાનન્દદમ્ ।
પ્રયચ્છતિ કથં સુરપ્રવરશઙ્કરારાધકઃ
સ તેન શિવપૂજનં પુનરપારભાગ્યપ્રદમ્ ॥ ૧૪॥

શિવવ્રતરતઃ સદા શિવકથાવિચારે રતઃ
શિવપ્રવણમાનસઃ શિવકથાનુમોદપ્રિયઃ ।
શિવં વદતિ સન્તતં શિવશિવેતિ નામ સ્મરન્
શિવં ભવતિ ભાવિતં સુકૃતરાશિભિઃ કેવલમ્ ॥ ૧૫॥

શિવં સુખકરં પરં વદતિ સાધુ વીરેશ્વરં
શિવં ભવતિ ચેતસા કમલકુન્દબિલ્વીદલૈઃ ।
સમર્ચયતિ સાદરં ગિરિકુમારિકાવલ્લભં
પરં સ્વકુલદૈવતં સતતમેવ મેને મુદા ॥ ૧૬॥

શ ૃણોતિ શિવવિદ્યયા પરમુદારકીર્તિં હરં
મહેશ્વરમહેશ્વરેત્યમરસાર્વભૌમં હૃદિ ।
વિચિન્ત્ય પુનરાદરાત્ કનકકેતકીચમ્પકૈઃ
કરોતિ વિકટાર્ચનં સમભિપૂજ્ય વીરેશ્વરમ્ ॥ ૧૭॥

અપારજલધારયા શિરસિ ચૈકવીરેશ્વરં
ચકાર સુમુખં મુહુઃ સ ખલુ કાલકાલાર્ચને ।
ચકાર કરણં વયો વિરત એવ સંસારતો

યુવાપિ યુવતીં વધૂમપિ વિહાય તન્માતરિ ॥ ૧૮॥

યદેવ ધનમાર્જિતં વિવિધશાસ્ત્રવિદ્યાત્મકં
તદપ્યગસુતાપતિસ્મરણકારણં કેવલમ્ ।
મનોઽપિ શિવવિદ્યયા પરમપાવનં તસ્ય વૈ
પ્રયાતિ શિવમન્દિરં સુરકૃતાર્યડિણ્ડીરવૈઃ ॥ ૧૯॥

ન તેન સુખસાધનં શિવપદામ્બુજારાધનાત્
વિભિન્નમપિ નિર્મિતં નિયમતોઽથવા નિશ્ચિતમ્ ।
તદેવ સકલાર્થદં પરમમુક્તિદાનક્ષમં
ન હાતુમપિ વાઞ્છિત પ્રબલસઙ્કટેઽપિ ધ્રુવમ્ ॥ ૨૦॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે સનન્દનપ્રોક્તં શિવવિદ્યામહિમાવર્ણનં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । હરાખ્યઃ તૃતીયાંશઃ । ઉત્તરાર્ધમ્ । અધ્યાયઃ ૨૯। ૫-૨૦॥

- .. shrIshivarahasyam . harAkhyaH tRRitIyAMshaH . uttarArdham . adhyAyaH 29. 5-20..

Proofread by Ruma Dewan

---

*Sanandanaproktam Shivavidyamahimavarnanam*
pdf was typeset on February 1, 2024

Please send corrections to *sanskrit@cheerful.com*